धुस्तुरः, पुं, (धुनोति कम्पयति चित्तं सेवनेन । धु कम्पने+“खर्ज्जिपिञ्जादिभ्य उरोलचौ ।” उणां ४ । ९० । इति उरः । “धुनोतेः सुट् च ।” इत्युज्ज्वलदत्तोक्त्या सुट् ।) क्षुपविशेषः । धुतुरा । इति भाषा । तत्पर्य्यायः । उन्मत्तः २ कितवः ३ धूर्त्तः ४ कनकाह्वयः ५ मातुलः ६ मदनः ७ । इत्यमरः । २ । ४ । ७७ ॥ धत्तूरः ८ । इति हेमचन्द्रः ॥ शठः ९ मातुलकः १० श्यामः ११ शिवशेखरः १२ खर्ज्जूघ्नः १३ काहलापुष्पः १४ खलः १५ कण्टफलः १६ मोहनः १७ कलभः १८ मत्तः १९ शैवः २० । इति राजनिर्घण्टः ॥ देविका २१ तूरी २२ महामोही २३ शिवप्रियः २४ धुस्तुरः २५ धुत्तुरः २६ । इति शब्दरत्नावली ॥ अस्य गुणाः ॥ मदवर्णाग्निवातकारित्वम् । ज्वरकुष्ठकालिमात्रणश्लेष्मकण्डूक्रिमिविषनाशित्वम् । कषायत्वम् । मधुरत्वम् । तिक्तत्वम् । उष्णत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥ कटुत्वम् । कान्तिकारित्वम् । त्वग्दोषखर्ज्जूभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ मूर्च्छाकारित्वम् । वह्निपित्तनाशित्वञ्च । इति राजवल्लभः ॥ (उपविषविशेषोऽयम् । तद्यथा,—

“अर्कक्षीरं स्नुहीक्षीरं तथैव कालहारिका ।
करवीरकधुस्तूरौ पञ्च चोपविषाणि तत् ॥
अर्कक्षीरं स्नुहीक्षीरं लाङ्गलीकरवीरकम् ।
गुञ्जाहिफेनधुस्तूरौ सप्तोपविषजातयः ॥”

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे ॥)

धू ञ कम्पे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-वेट् ।) स चेहापि कम्पप्रेरणमेव । ञ, धवति धवते । धवति चन्दनमञ्जरीश्चेति हलायुधः । इति दुर्गादासः ॥

धू, न ञ गि कम्पे । इति कविकल्पद्रुमः ॥ (स्वां-क्र्यां च-उभं-सकं-वेट् ।) स चेहापि कम्पप्रेरणम् । न ञ, धूनोति धूनुते । गि ञ, धुनाति धुनीते । धूनः धूनिः । धूनोति चम्पकवनानीति हलायुधः । धुनाति वायुरश्वत्थम् । धुनीते बन्धूकं तिलकुसुमजन्मा हि पवनः । इति दुर्गादासः ॥

धू, शि क कम्पे । इति कविकल्पद्रुमः ॥ (तुदां-चुरां-च-सकं-सेट् ।) कम्प इह ण्यन्तस्य रूपम् । शि, धुवति मारुतो मालतीलताम् । अधुवीत् । क, धावयति । वायुर्विधूनयति केशरपुष्परेणूनिति चुरादौ हलायुधः । प्रीधूञोर्नुग् वा इत्यत्र धूञग्रहणादस्य कथं नगिति चेन्न । स्वार्थविहितस्य णेञ्कारेण सम्बन्धस्य बाध्यत्वात् । अन्यथा कम्पप्रेरणे धूनयति इत्यादिप्रयोगा न स्युः । धूनोतीत्यादीनां साध्या इति चेत् स्वभावात् कम्पप्रेरणार्थानां तेषां णौ कृते कम्पप्रेरकस्य प्रेरणमेवार्थः स्यात् । किञ्च कम्पनायां धूनयतीत्यादीनामावश्यकत्वात् तत्सूत्रे ञकारः प्राचीनमतानुवादार्थं एव । इति दुर्गादासः ॥

धूः, [र्] स्त्री, (धुर्व्वतीति । धुर्व्व+क्विप् ।) यानमुखम् । रथादेरग्रभागः । इत्यमरः । २ । ८ । ५५ ॥ (यथा, महाभारते । १ । १३६ । २१ ।

“क्षणात् प्रांशुः क्षणाद्ध्रस्वः क्षणाच्च रथधूर्गतः ॥”)

भारः । (यथा, रघुः । १ । ३४ ।

“तेन धूर्जगतो गुर्व्वी सचिवेषु निचिक्षिपे ॥”)

चिन्ता । इत्येकाक्षरकोषः ॥ (अग्रम् । यथा, रघुः । २ । २ ।

“अपांसुलानां धुरि कीर्त्तनीया ॥”

हिंसके, त्रि । यथा, ऋग्वेदे । १० । ९४ । ७ ।

“दशधुरो दशयुक्ता वहद्भ्यः ॥”

“दशभिर्धुरो धूर्भिर्हिंसितृभिः । तृतीयार्थे प्रथमा ।” इति तद्भाष्ये सायनः ॥)

धूकः, पुं, (धूनोति कम्पयतीति । धू+“अजियुधूनीभ्यो दीर्घश्च ।” उणां ३ । ४७ । इति कन् ।) वायुः । इत्युणादिकोषः ॥ धूर्त्तः । कालः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धूतः, त्रि, (धू+क्तः ।) कम्पितः । (यथा, मेघदूते । ३५ ।

“धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥”)

भर्त्सितः । इति मेदिनी । ते, २८ ॥ त्यक्तः । इत्यमरः । ३ । १ । १०७ ॥ तर्कितः । इति धरणिः ॥

धूनः, त्रि, (धू+“स्वादिभ्यः ।” ८ । २ । ४४ । इति निष्ठातस्य नः ।) कम्पितः । धूधातोः क्तः स्वादित्वात्तस्य णादेशः । इति संक्षिप्तसारव्याकरणम् ॥

धूनकः, पुं, (धूनयति संधुक्षयति अग्निमिति । धू+णिच्+ण्वुल् ।) वह्निवल्लभः । इति त्रिकाण्डशेषः ॥ धूना इति भाषा ॥

धूननं क्ली, (धू+णिच्+ल्युट् ।) कम्पनम् । काँपान । इति भाषा । इति ण्यन्तधूधातोरनटा साध्यम् ॥ (यथा, राजतरङ्गिण्याम् । ६ । १२ ।

“कुर्व्वाणा भक्तिशीलश्रीनिषेधं मूर्द्धधूननैः ॥”)

धूनिः, स्त्री, कम्पनम् । धूधातोः क्तिस्थाने स्वादित्वान्निः । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

धूप, तापे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) षष्ठस्वरी । धूपायति धूपायते । आयन्तत्वादुभयपदमिति वोपदेवः । अन्ये तु आयस्याप्राप्तिपक्षे परस्मैपदमेव । अधूपीत् दुधूप इत्यादि । तापः सन्तप्तीकरणम् । इति दुर्गादासः ॥

धूप, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट ।) क, धूपयति । इति दुर्गादासः ॥

धूपः, पुं, (धूपयति स्वगन्धेन प्रीणयित्वा दीप्यतीति । धूप+अच् ।) गन्धद्रव्यविशेषोत्थधूमस्तद्दर्शनञ्च । तत्पर्य्यायः । गन्धपिशाचिका २ । इति हेमचन्द्रः । ३ । ३१३ ॥ * ॥ यथा,—

“एवं वां कथितो दीपो धूपञ्च शृणुतं सुतौ ।
नासाचिरन्ध्रसुखदः सुगन्धोऽतिमनोहरः ॥
दह्यमानस्य काष्ठस्य प्रयतस्येतरस्य वा ।
पराग्न्याथवा धूमो निस्तापो यस्य जायते ॥
स धूप इति विज्ञेयो देवानां तुष्टिदायकः ।
शाखोट्कृतेर्न चैकत्र तैर्द्रव्यैः परिधूपयेत् ॥
ओषाग्निवत्तथा कृत्वा न तत्फलमवाप्नुयात् ।
श्रीचन्दनञ्च सरलः सालः कालागुरुस्तथा ॥
उदयः सुरथः कन्दी रक्तविद्रुम एव च ।
पीतसालः परिमली विमर्द्दोकासनस्तथा ॥
नमेरुर्द्देवदारुश्च विल्वसारोऽथ खादिरः ।
सन्तानः पारिजातश्च हरिचन्दनवल्लभौ ॥
इत्येषु धूपाः सर्व्वेषां प्रीतिदाः परिकीर्त्तिताः ।
अराजः सह खन्नश्च श्रीवासः पटवासकः ॥
कर्पूरः श्रीकरश्चैव परागः श्रीहरामलौ ।
सर्व्वौषधिरजोजातो वाराहचूर्णं उत्कलः ॥
जातीकोषस्य चर्ण्णञ्च गन्धः कस्तूरिका तथा ।
चोदे हृत्ते च गादता धूपा एते उदाहृताः ॥
यक्षधूपो हृकधूपः श्रीपिष्टोऽगुरुकर्कशः ।
पञ्चवाहः पिण्डधूपः सुगोलः कण्ठ एव च ॥
अन्योन्ययोगनिर्य्यासा धूपा एते प्रकीर्त्तिताः ।
एतैर्विधूपयेद्देवान् धूमिभिः कृष्णवर्त्मना ॥
येषां धूपोद्भवैर्घ्राणैस्तुष्टिं गच्छन्ति जन्तवः ।
निर्य्यासञ्च परागञ्च काष्ठं गन्धं तथैव च ॥
कृत्रिमञ्चेति पञ्चैते धूपाः प्रीतिकरा मताः ।
न यक्षधूमं वितरेत् माधवाय कदाचन ॥
न रक्तविद्रुमं मह्यं सुरथं स्कान्दनं तथा ।
यक्षधूपः पञ्चवाहः पिण्डधूपः सुगोलकः ॥
कृष्णागुरुः सकर्पूरो महामायाप्रियः स्मृतः ।
यक्षधूपेन वा देवीं महामायां प्रपूजयेत् ॥
यक्षधूपेनेत्यत्र हृकधूपेनेति च पाठः ॥
मेदोमज्जासमायुक्तान् न धूपान् विनिवेदयेत् ।
परकीयांस्तथा प्राप्तान् स्वीकृत्याभिमर्द्दितान् ॥
पुष्पं धूपञ्च गन्धञ्च उपचारांस्तथापरान् ।
प्राप्तान्निवेद्य देवेभ्यो नरो नरकमाप्नुयात् ॥
न भूमौ वितरेत् धूपं नासने न घटे तथा ।
यथा तथाधारगतं कृत्वा तद्विनिवेदयेत् ॥
रक्तविद्रुमशालौ च सुरथः सरलस्तथा ।
सन्तानको नमेरुश्च कालागुरुसमन्वितः ॥
जातीकोषाद्यसंयुक्तो धूपः कामेश्वरीप्रियः ।
त्रिपुरायास्तथैवायं मातॄणामपि नित्यशः ॥
सर्व्वेषां पीठदेवानां कान्तादीनाञ्च पुत्रक ! ।
एष वां कथितो धूपः शृणु तं नेत्ररञ्जनम् ॥”

इति कालिकापुराणे ६८ अध्यायः ॥

अपि च ।

“पुष्पाणि च सुगन्धीनि धूपञ्च घृतसंयुतम् ।
गुग्गुलुं कुन्दुरुं चैव देवदारु तुरुष्ककम् ॥
सिह्लकं चन्दनं काष्ठं श्रीवासं चागुरुं तथा ।
सर्ज्जरसं नखं चैव दैवे पैत्रे च कर्म्मणि ॥”

इति वह्निपुराणे भोजनविधाननामाध्यायः ॥ * ॥

रोगनाशकधूपो यथा,—

“कूर्म्ममत्स्याखुमहिषगोशृगालाश्ववानराः ।
विडालबर्हिकाकाश्च वराहोलूककुक्कुटाः ॥
हंस एषाञ्च विण्मूत्रं मांसं वा रोम शोणितम् ।
धूपं दद्याज्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये ॥